# को वा गजाननः!

## कुत उपास्यः

लेखकः - चिन्तगुण्ट सुब्बरायः सिकंदराबाद् ।।

वाक्यं रसात्मकं काव्यमिति लाक्षणिकप्रमाणात् रसोत्पादकं वाक्य मेकमपि संपूर्ण रसवत्काव्यालाप नलाभं ददातीति सिध्यति। साहित्यं रसापेक्षकमित्यपि । अतः काव्ये वाक्यानि एकैकशः चिन्दन्तनीयानीति जानीमहे । एवं चिन्तिते काव्ये पुनः पुन श्चर्विते इक्षुखण्डे माधुर्यानुभवमिव रसानुभूतिर्लभते । अर्थावबोधनं विपुलतरं च गूढाथस्फूर्तिरपि भवेत् । वाक्यं वा काव्यं स्थायिभेदेन विभिन्नार्थद्योतकं भवेत् ।

नानृषिः कुरुते काव्यमिति वचनात्कविना स्वे द्रष्ट्रत्वे यद्दर्शितं सत्यं तत्सर्वं पुनस्तस्य जागृत लौकिकस्पृहायां भासते इति न मन्तव्यम् । परं तु तस्य काव्ये भाषाभिव्यक्ति रूपे तस्य पूर्णदर्शनं निक्षिप्तमेवेति वक्तव्यम् । आलोचनामग्नेन पाक्षिकेन तद्दर्शनं संपूर्णं वा पाक्षिकं पुनरनुभूयते । एतादृश आलोचनामृतबिंदुरेको अत्र समर्पितः । अवधेयस्तु

अगजाननपद्माकंगजाननमहर्निशम् ।
अनेकदं तं भक्ताना मेकदंत मुपास्महे ।।

इतिदं श्लोकार्यो विचार्यते । सुप्रसिद्धश्च श्लोक स्सुस्पष्टस्तदर्थः । पावतीपुत्र एकदन्तो गजानन अनेकदस्तस्मादहर्निशमुपास्य इति रूढ्या तात्पर्यः ।

हिमवतः पुत्रिः पार्वतीति च तस्याः पुत्रो गजानन इति च तस्यानुग्रहं विना कार्यसिध्दिर्न भवेदिति हैन्दवीयः विश्वासो अद्यापि प्रवर्तते । विश्वासेन प्रकृत्याः अधिभौतिकदर्शनं लभते । पर्वतेषु स्त्रीपुंभेद श्च मातृपितृपुत्रिपुत्रभ्रात्रादि मानवीयसंप्रदायश्च पुनरनुग्रहादि दैवगुणश्च विश्वासेनैव दर्शिताः । हेतुबुध्दिः किमपि वदेत् विश्वासो मनुष्याणां श्वास एव ।

प्रथमपूज्यो गजानन इति च स अभीष्टाणि प्रददातीति च हैन्दवै ऊपास्यते । मानवानामीप्सितानि लौकिकजीवनविषयाणि च ऐहिकसुखान्यनेकानि । अनेकत्वं प्राकृतिकलक्षणम् । श्लोके प्रयुक्त अनेकदशब्द स्संसारस्यस्वरूपस्वभावौ रूपयति । प्राकृत मानवस्य क्लेश अनेका अनेका श्चाशाः काम्याः । परं तु गजाननस्पर्वेषां पशुपक्षिवृक्षादीनामपि जीवनोपयोगवस्तून्यनेकानि ददातीति मन्तव्यः । यदि केवलं भक्तानामेव सो ददाति तर्हि अभक्ता जीवितायोग्या भवन्ति । पशुपक्षिवृक्षादयः येषु भक्तिभावांकुरो अपि न जायते ते नष्टप्राणा इति सिध्यति । तथा ते न नश्यन्ति । तस्माद् गजाननस्सर्वरक्षक एवेति भाव्यः कथं वा भक्तइति संभाव्यः। विभक्तएव सः । भक्तो नाम यो अविभक्तमनसा देवं ध्यायति स एव। अथ विशेषभक्तानां अर्थादलौकिकलक्ष्यसाधकानां उपासकानां किं वा ददाति गजानन इति श्लोको अयं न भाषते । एतादृश अविभक्तमनस्का उपासका गजाननात्विकं वा वरलाभं प्राप्तुकामा इति समीक्ष्य कथ्यते मोक्ष मिच्छन्ति ते इति। नूनं श्लोके तु मोक्ष प्रसङ्गो नास्ति । परं तु एकदन्तशब्द एकदं तं इत्यपि विभाज्यः । एकस्माद्विभागान्मोक्षशप्रदार्थकः एकद शब्दो लभते । यदि भक्तानां शब्द एकदशब्देन संयुज्यते तदा गजाननो भक्ताना मेकदो भवेत् । एकद इति कैवल्यप्रदः । व्यंजनार्थेन एक शब्दः । कैवल्यः समानार्थको भवति ।

परं तु एकदन्तं शब्द एकदं तं इत्यापि विभाज्यः । एकस्माद्विभागान्मोक्षप्रदायकः एकद शब्दो लभते । यदि भक्तानां शब्द एकद शब्देन संयुज्यते तदा गजाननो भक्तानामेकदो भवेत् । एकद इति कैवल्यप्रदः । व्यंजनार्थेन एक शब्दः । कैवल्यसमानार्थको भवति ।

श्लोकनिर्मितिं विचारयन्नपि एतदन्वयसमर्थनं समुचितं दृश्यते यथा श्लोकस्य पूवार्धे अगजानन शब्दस्य गजानन शब्दोपश्लेषो यथा तथैव उत्तरार्धे अनेकदशब्दस्य एकदशब्दोपश्लेषः । अहर्निशमुपास्महे इति वचनात् विशेषाविभक्तनिष्ठा ग्राह्या या निष्ठा एकस्वरूपमुक्ति वा कैवल्यं वा संसारानेकत्वविरोधे परमात्मैकत्वं लक्षयते । तथा गजानन एकदशब्दवाच्यो भवति ।

भक्तानां कैवल्यप्रदाने गजाननस्य निर्व्यलीकता विचार्या । को वा गजाननः । अस्यान्वयः को वा । गजाननो नाम गज इव यस्य दर्शनं सः । न तु गजस्य आननं यस्य स इति । यो गायाः जातः सो गजः । अर्थात् गजाननो गज इव दर्शितः गायाः पुत्रः । गा नाम्नि का वा सा । सा तु स्वय मगजा । पुनः को वा एतदगः । तस्माद् गजानन अगस्य दौहित्रश्च, गा अगस्य पुत्रि गजस्य मातापि ।

परं तु यो कः का इत्युत्पादितप्रश्नो तौ समाधेयौ । अत्र गजागजशब्दौ गत्यर्थक गम्लृधातुसंगतौ। अतो गा नाम्नि गतिशीला यस्या अपत्यं पुमान् गज इति सिध्यति । गजा अपि गतिशीला एव । पुनस्तस्य मातामहस्त्वग इति ज्ञातः । अर्थादगो निश्चलः । गम्लृधातुरत्र गतिप्रतीकं परिणामशीलं बोधयति । <u>एवंगुणविशिष्ठा च माता गा पुत्रो गजः । अगजाननपद्मार्को गजानन इति कवेः</u>

वर्णनं संस्मरन् पुत्रप्रसन्ना अगजा वा गा इति जानीमहे । प्रतीकार्थेन गतिशीला गा वा पार्वती स्वयं प्रकृतिरेव । अनेकत्वं च यथा परिणामशीलं तस्याः गुण एव तथा । अतो प्रकृत्याः (गायाः) वा पार्वत्याः वात्सल्यानुरूपो गजाननस्सर्वेषामनेकदो भवति । अथ अग इति प्रतिकार्ये सर्वशक्तिमूलकं अव्याजकारुण्यं यदस्ति तद् भवितव्यम् । इत्थं पूर्णमदः पूर्णमिदम् इति स्मृतिवचनं स्मर्यते । पूर्णत्वं गजाननस्य मातृकं दायं भवति च दौहित्रभोज्यं ऐश्वर्यम् । तस्माद् गजाननस्सर्वेषां अनेकदो भक्तानामेकदश्चभवितुमर्हति । तस्मादेव सो अहर्निशमुपास्यो भवति मुक्तिकामिभिः ।

इति शम्